श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री रघुनाथाध्वरिविरचिता

# ॥ आचार्यविंशतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Smt. Goda Gopal and Sri. U. Ve. P. Ramanujam for proofreading this document and Sri. R. Rajeevalochan for the help rendered in preparing this document.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ आचार्यविंशतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

स्वान्तान्तस्सन्ततासीनप्राचीनार्वन्तमाश्रये
त्रय्यन्तसूरिमाश्चर्यचर्यं तं तारकं सताम्॥ १ ॥

मथनदशाविशालकलशाब्धिकृशान्यभृशा
पतितसुधामुधाकरविधाः किल यस्य गिरः।
जगति जयन्ति तस्य तुरगास्यविकल्पतनो-
र्निगमशिखागुरोश्चरणमस्मि गतश्शरणम्॥ २ ॥

मणिमयघण्टया समुदभावि फणीन्द्रमही-
धरनिलयस्य पद्मतनयस्य यदात्मतया।
जयति जनान्तरङ्गघनतुङ्गतमाघतमः-
क्षपण कृपावतार सविता स गुरुप्रवरः॥ ३ ॥

स्फुरदुरुतर्क कर्कश नखाङ्कुशसन्दलित-
प्रतिकथकेभ कुम्भ विगलन्मणिमालिकया।
यतिपतिभारतीसुदृगुरोरुहकुम्भतटीं
जगति विभूषयन् विजयते कविसिंहगुरुः॥ ४ ॥

कुमतिमतानलोच्चलदुदारशिखावलया-
न्तरगतलोकशोकपरिमोचनसेचनकृत्।
चिरमतनीयसी जयति पद्मवनीविगळ-
त्परिमळबन्धुरा गुरुधुरन्धरसूक्तिसुधा॥ ५ ॥

अपहृतदुग्धसिन्धुसुषुमैरहिराजवपु-
र्द्युतिभरसोदरैरमृतभानुविहारहरैः।

www.prapatti.com

निगमकिरीटसूरिवरकीर्तिमणिप्रकरै-
रखिलहरिद्वधूकुचतटीपरिकर्म कृतम्॥ ६॥

घनमदवादिसङ्घमकुटीतटपूर्वधरा-
धरशिखराञ्चले जगति यस्य कथासमरे।
लसति यदीयसव्यपदभागिलसत्कटको
जयति स वेङ्कटेशगुरुराडभिरामयशाः॥ ७॥

श्रुतिशिखरार्यवर्यगुणदुग्धपयोधिभवं
कणमपि वाक्पतिर्गणयितुं किल कुण्ठितधीः।
किमुत मितंपचस्य कुदृशस्तदपीह बला-
न्मुखरयति स्पृहा गुरुधुरीणपदाब्जगता॥ ८॥

निगमकिरीटसूरिवचनामृतवारिनिधे-
रपि तलमस्पृशन्निजमनोरथपूर्तिमयात्।
हरिधृतमन्दरप्रमथिताम्बुधिलब्धसुधा
भवति सुधाशसंसदिह सम्यगुदाहरणम्॥ ९॥

अपि विमलान्ववायजनिलाभविदूरतरा
अपि च शमादिसम्पदभिराममनोविधुराः।
निगमकिरीटसूरिचरणारुणतामरस-
स्मरणविकल्मषास्समुपयान्त्यपि शेषशयम्॥ १०॥

भवसलिलाकरान्तरभिमज्जदुपघ्नकरा
जनितसुधाकरांशुचयभासुरधीप्रकराः।
कुमतिभयङ्करान्धतमसा हिमभानुकरा
ददतु शुभाङ्कुरान् कथकसिंहवचोनिकराः॥ ११॥

निगमशिखागुरोरमरसिन्धुतरङ्गघटा-
मदहरलीलया महितसूक्तिपरम्परया।
यतिपतिभाष्यसौधवलभीपरिकर्मकृता
विजयपताकया समजनीव समुच्छ्रितया॥ १२॥



www.prapatti.com

ललितसितोर्ध्वपुण्ड्ररमणीयललाटतटं
स्फुरितविभातभानुरुचिभातसरोजदृशम्।
सुभगशिखोज्ज्वलं सुमशरासधनुस्सुषमा
हररुचिरभ्रुवं सुतमनन्तगुरोः कलये॥ १३॥

तिलसुमसोदरोन्नसमुदाररदावलिसं-
स्फुरदधराधरीकृतसमौक्तिकविद्रुमकम्।
सुललितकर्णपाशविलसन्मणिकुण्डलभा-
धलधलगण्डभित्तिमभिराममुखाम्बुरुहम्॥ १४॥

पृथुलसुवृत्तदीर्घभुजशृङ्गसुसङ्गतिम-
द्रथचरणाम्बुजाङ्कमनवीनवचश्शिरसाम्।
गुरुवरमाद्रिये तनुतरोदरकम्बुलसत्
गळतललम्बमानतुलसीनळिनाक्षसरम्॥ १५॥

सुमविशिखेषुधिप्रतिमजङ्घमुदग्ररुचि-
प्रबलजितामलेन्दुनखराञ्चितपद्मपदम्।
अभिनवरामणीयकनिदानमबोधतमो
निरसनभास्करं भजत वेङ्कटनाथगुरुम्॥ १६॥

जयति स देशिको जगदरुन्तुदवादिगज-
प्रमथनकेसरी विजयकेतुमिव प्रददौ।
श्रुतिशिखरार्यवर्यबिरुदं भुवि यस्य कथा
रणतलदीव्यतस्सदसि रङ्गधरामरराट्॥ १७॥

हृदि कलयन्ति ये निगममौलिगुरोश्चरणौ
जगति भवन्ति ते जितकुवादिवचोनिवहाः।
चलितसरस्वतीचरणनूपुरमञ्जुतर-
क्वणितसुधासदृग्वचनगन्धिमुखाम्बुरुहाः॥ १८॥

अतिभुजगाधिराजमतिगीष्पति यस्य नया
अतिकणभक्षदृष्टिपदजैमिनिवाङ्निकराः।



www.prapatti.com

निगमशिखाटवीविहरमाणमनः कलभो
मम कुलदैवतं गुरुरसौ निगमान्तगिराम्॥ १९ ॥

विषयविषानलज्वलितजीवनिकायसमु-
द्धरणकृतेऽवतीर्णमहिराजधरेन्द्रविभोः।
कृतनवलीलमाशु करुणावरुणालयभू-
विमलसुधाकरं भजत वेङ्कटनाथगुरुम्॥ २० ॥

कवनकलासु वा कथकलोकमदापहृति-
क्षमतरवाङ्निगुम्भरचनाकलनास्वपि वा।
यदि किल साशताहृदय वेङ्कटनाथगुरुं
भज भज दिष्टसृष्टिसुरशाखिपदाब्जयुगम्॥ २१ ॥

इयमनवीनसूक्तिशिखरार्यपदाम्बुरुह-
प्रवणसदार्यवंशजनिमद्वरदार्यसुतात्।
अजनि शकुन्तराजजयकेतनदासवराद्
गुरुतिलकस्तुतिर्दिशतु सा मुदमद्य सताम्॥ २२ ॥

शेषाहिशायिपदपङ्कजभक्तिसिन्धु-
पोषावहा श्रवणमात्रवशाज्जनानाम्।
एषा स्तुतिर्निगमशेखरदेशिकस्य
भूषामणीव सुदृशां हृदये चकास्तु॥ २३ ॥

सद्वंशजस्सुवृत्तश्शुभगुणशाली सदा विशुद्धात्मा
रघुनाथदेशिकमणिर्विलसतु हृदये महागुरुः श्लाघ्यः॥ २४ ॥

॥ इति आचार्यविंशतिः संपूर्णा॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥



www.prapatti.com